12-Dec-09

Exceptions for some common roots

घु-मा-स्था-गा-पा-जहाति-सां हलि ॥ ६.४.६६ [ईत् क्ङिति आर्धधातुके]

वृत्ति = घु-संज्ञकानां अङ्गानां मा, स्था, गा, पा (पा पाने) हा (ओहाक् त्यागे) , सा (षो अन्तकर्मणि) इत्येषां च हलादौ क्ङित्यार्धधातुके परतो ईकारादेशः भवति।

The final letter (आ) of angas of dhatus with name घु, मा, स्था, गा, पा (पा पाने) हा (ओहाक् त्यागे) , सा (षो अन्तकर्मणि) will be replaced by ई when followed by a क्ङित् , आर्धधातुक, हलादि प्रत्यय (like यक्).

Examples: दा – दीयते, मा – मीयते, ष्ठा -> स्था - स्थीयते

गै -> गा -> गीयते, पा -> पीयते, हा -> हीयते

षो -> सो -> सा -> अव-सीयते

आदेच उपदेशेऽशिति ॥ ६.१.४४

आत्(१/१) एचः(६/१) उपदेशे (७/१) अशिति(७/१)

वृत्ति = उपदेशावस्थायां य एजन्तो धातुः तस्य आकार आदेशो भवतो, शिति प्रत्यये परस्तु न भवति ।

The final of dhatu from upadesa (i.e. from the dhatupatha) ending in एच् will be replaced by आ – this will however not happen if the dhatu is followed by a शित् प्रत्यय

Examples: ग्लै –> ग्ला in ग्लातुम्, ग्लाता, म्लै -> म्ला , सो -> सा,

Special rules when the roots have a final or a penultimate ॠ – application of these is far wider than just कर्मणि प्रयोग

ॠतः इद् धातोः ॥ ७.१.१०० [अङ्गस्य]

वृत्ति = ॠकारान्तस्य धातोः अङ्गस्य इकारादेशो भवति ।

The final ॠ of a dhatu is replaced by a इ. (Note that this rule has a lower priority than the guna vrddhi rules and applies only when they cannot. So typical examples in kartari prayoga will be in cases where श्यन्, श which cannot cause guna etc.)

(उरण् रँपरः १.१.५१ applies because ऋकार [which includes ॠ or ॠ by the savarna rule अणुदित् सवर्णस्य चाप्रत्ययः १.१.६९] is replaced with अण् and brings a र् after the replaced अण्)

किरति (कॄ विक्षेपे 6P to scatter+ तिप्) , गिरति (गॄ निगरणे 6P to swallow + तिप्), कॄ+क्त -> किर् त -> किर् न = कीर् न = कीर्ण कीर्यते, जीर्यते (जॄ वयोहानौ 4P), तीर्यते (तॄ प्लवन-तरणयोः 1P) जीर्ण, तीर्ण

The next sutra extends the rule to dhatus which have a penultimate ॠ

उपधायाश्च ॥ ७.१.१०१ [ॠतः इद् धातोः अङ्गस्य]

वृत्ति = धातोः अङ्गस्य उपधायाः ॠकारस्य स्थाने इकारादेशो भवति ।

The penultimate ॠ of the anga of a dhatu is replaced by a इ.

Examples: कीर्त्यते, कीर्तयति (धातु कॄत्) – किर् त्

An apavada to bring उ instead of इ for some ॠकारन्त roots -

उदोष्ठ्यपूर्वस्य ॥ ७.१.१०२ [ॠतः धातोः अङ्गस्य]

वृत्ति = ओष्ठ्यः पूर्वो यस्मात् ॠकारात् तदन्तस्य धातोः अङ्गस्य उकारादेशो भवति ।

The final ॠ of a dhatu , which is preceded by a labial, is replaced by a उ (and not by इ).

(उरण् रँपरः १.१.५१ applies because ॠकार is replaced with अण् and brings a र् after the replaced अण्)

Examples: पूर्यते (पॄ पालन-पूरणयोः), वूर्यते (वॄञ् वरणे), पूर्ण

The next sutra causes दीर्घत्वम् (2 matras) of the penultimate with reference to the penultimate of the dhatu, when the penultimate character in the dhatu is र् or व्

उपधायां च॥ ८.२.७८ [धातोः र्वोः उपधायाः इकः दीर्घः हलि]

वृत्ति = हलि परतो यौ धातोरुपधाभूतौ रेफ-वकारौ तयोः उपधायाः इको दीर्घो भवति ।

The penultimate इक् with reference to the penutimate of a dhatu which has र् or व् as penultimate will be replaced by its दीर्घ form when it is followed by a हल्.

Examples: कीर्त्यते, कीर्तयति

कृत् + तिप्

कृत् + णिच् + शप् + तिप्

किर् त् + इ + शप् + ति (by उपधायाश्च & उरण् रपरः)

Here in किर् त् – The penultimate of the dhatu is र्, it is followed by त् which is a हल्, and the penultimate with reference to this penultimate र्, is इ (the इ in किर्) – thus the conditions for the sutra to apply are fulfilled and this इ which is the penultimate of the penultimate of the root is replaced by a दीर्घ form, yielding:

कीर् त् इ + शप् + तिप् = कीर्ति + शप् + तिप्

कीर्ते अ + तिप् = कीर्तयति

When an anga ends in ऋ

रिङ् श-यग्-लिङ्क्षु ॥ ७.४.२८ [ऋतः अङ्गस्य अकृत्-सार्वधातुकयोः यि क्ङिति]

वृत्ति = ऋकारान्तस्य अङ्गस्य श यक् इत्येतयोः लिङि च यकारादौ असार्वधातुके परतो रिङ् इत्ययमादेशो भवति।रिङ्वचनं दीर्घनिवृत्यर्थम् ।

The final letter of a ऋकारान्त अङ्ग when followed by श (गण-विकरण for तुदादि गण), यक् or a लिङ् pratyaya beginning with yakara and which is non-sarvadhatuka (i.e. ardhadhatuka), will be replaced by रिङ् . This is an apavada to 7.4.25.

यक् examples: क्रियते, भ्रियते, म्रियते, अनु-स्रियते, ह्रियते

श examples: म्रियते, आ-द्रियते

The next sutra is not a very commonly used one..

गुणोऽर्तिसंयोगाद्योः ॥ ७.४.२९ [ऋतः अङ्गस्य अकृत्-सार्वधातुकयोः यि क्ङिति]

वृत्ति = अर्तेः संयोगादीनां ऋकारान्तानां अङ्गानां यकि लिङि च यकारादौ असार्वधातुके परतो गुणः भवति।

Examples - स्मर्यते

Some धातु आदेशाs for आर्धधातुक situations

अस्तेर्भूः ॥ २.४.५२ [आर्धधातुके]

वृत्ति = अस् धातोः स्थाने भू इत्ययम् आदेशो भवति आर्धधातुके विषये।

Examples: भूयते, भवितुम्, भवितव्यम्

ब्रुवो वचिः ॥ २.४.५३ [आर्धधातुके]

वृत्ति = आर्धधातुके विषये ब्रूञ् धातोः स्थाने वचिरादेशो भवति ।

Examples: उच्यते, वक्ता, वक्तुम्, वक्तव्यम्

चक्षिङः ख्याञ् ॥ २.४.५४ [आर्धधातुके]

वृत्ति = चक्षिङ् धातोः स्थाने ख्याञ् आदेशो भवति आर्धधातुके विषये।

Examples: आख्यायते, आख्याता, आख्यातुम्

चक्षिङ् यक् + ते -> ख्या य ते = ख्यायते

चक्षिङ् तृच् = ख्या तृ = ख्यातृ – १/१ – ख्याता

चक्षिङ् तुमुन् = ख्या तुमुन् = ख्यातुम्

Some other common धातु आदेशाs

शमामष्टानां दीर्घः श्यनि ॥ ७.३.७४ [अङ्गस्य]

वृत्ति = शमादीनाम् अष्टानाम् अङ्गानां दीर्घो भवति श्यनि परतः।

So शम्यते, दम्यते in karamani but शाम्यति, दाम्यति in kartari

इषु-गमि-यमां छः ॥ ७.३.७७ [शिति अङ्गस्य]

वृत्ति = इषु, गम्लृ, यम इत्येतेषाम् अङ्गानां शिति परतः छकारादेशः भवति।

So इष्यते, गम्यते, यम्यते in karamani but इच्छति, गच्छति, यच्छति in kartari

इषु शप् तिप् = इछ -> इच्छ

पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदां पिब्-जिघ्र्-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः । ७.३.७८ [शिति अङ्गस्य]

Examples: पीयते-पिबति, स्थीयते-तिष्ठति, दृश्यते-पश्यति

ज्ञा-जनोर्जा ॥ ७.३.७९ [शिति अङ्गस्य]

वृत्ति = ज्ञा, जनी प्रादुर्भावे इत्येतयोः अङ्गयोः स्थाने शिति प्रत्य्ये परतः जा इत्य्यमादेशो भवति।

The roots ज्ञा, जनी प्रादुर्भावे will take the replacement जा

Examples: So ज्ञायते, जन्यते in karamani but जानाति, जायते in kartari